**विघटित** त्रि॰ वि+घट-क्त । १वियोजिते २विशेषेण रचिते च ।

**विघट्टित** त्रि॰ वि+घट्ट-क्त । १चालिते २वियोजिते च ।

**विघस** पु॰ वि+अद-घञ् । भोजनशेषे मेदि॰ २आहारे च शब्दच॰ । ३सिक्थके न॰ राजनि॰ । ४दैवपैत्रदत्तशेषे

**विघसाशिन्** त्रि॰ विघसं देवतादिदत्तावशेषमश्नाति अश–णिनि । दैवपैत्रकार्य्यानन्तरं तदवशिष्टभोजिनि ।

**विघात** पु॰ वि+हन-क्त । १व्याघाते २आघाते च ।

**विघातिन्** त्रि॰ वि+हन-णिनि । १निवारके । २नाशके, ३नाशप्रतियोगिनि च "नित्यश्चायं वलुनिमित्तो विघाती" इति व्याकरणका॰ । ण्वुल् । विघातकोऽप्यत्र ।

**विघ्न** पु॰ वि+हन-क । १व्याघातके अन्तराये अमरः । २कु-ष्माण्डपाकफलायां शब्दच॰ । [गणेशे शब्दर॰ ।

**विघ्ननायक** पु॰ विघ्नानामुत्पत्त्यनुत्पत्त्योः नायकः । विघ्नेशे

**विघ्नकारिन्** त्रि॰ विघ्नं करोति कृ–णिनि । १घोरदर्शने २विघातके च मेदि॰ । स्त्रियां ङीप् । [ऽप्यत्र ।

**विघ्ननाशक** पु॰ ६त॰ । गणेशे शब्दच॰ ल्यु । विघ्ननाशनादयो-

**विघ्नराज** पु॰ विघ्ने राजते राज–अच् । गणेशे अमरः । ६त॰ । विघ्नेशादयोऽप्यत्र ।

**विघ्नहारिन्** पु॰ विघ्नं हरति हृ–णिनि । गणेशे त्रिका॰ ।

**विघ्नित** त्रि॰ विघ्नो जातोऽस्य इतच् । जातविघ्ने ।

**विघ्नेशानकान्ता** स्त्री ६त॰ । श्वेतदूर्वायाम् राजनि॰ ।

**विच** पृथक्करणे रु॰ जु॰ वा उ॰ सक॰ अनिट् । विनक्ति वि-वेक्ति विङ्क्ते विविक्ते । इरित् अविचत् अवैक्षीत् ।

**विचकिल** पु॰ विच+क किल-क कर्म॰ । १मदनवृक्षे । २मल्लीभेदे मेदि॰ । [२नागदन्त्यां स्त्री राजनि॰ टाप् ।

**विचक्षण** पु॰ वि+चक्ष-ल्यु न ख्यादेशः । १पण्डिते अमरः

**विचक्षुस्** त्रि॰ वि+चक्ष–उसि न ख्यादेशः । १विमनस्के त्रिका॰ । विगतं चक्षुर्यस्य । २नेत्रशून्ये त्रि॰ । [चयने च ।

**विचयन** न॰ वि+चि-ल्युट् । १अन्वेषणे शब्दच॰ । २पुष्पादि-

**विचर्चिका** स्त्री वि+चर्च-ण्वुल् । पामनि रोगभेदे अमरः । सा च अल्पकुष्ठविशेषः । "एकं कुष्ठं स्मृतं पूर्वं गजचर्म ततः स्मृतम् । ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका । विपादिकाभिधा सैव पामा कच्छुस्ततः परा । ततो दद्रुश्च विस्फोटः किटिमञ्च ततः परम् । ततश्चालसकं प्रोक्तं शतारुश्च ततः परम् । क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः । सकण्डूः पिडका श्यावा बहुस्रावा विच-र्चिका" पिडका क्षुद्रपिडका । "दाल्यते त्वक् खरा रूक्षा-जान्वोर्या विचर्चिका । पादे विपादिका ज्ञेया स्थान-भेदाद्विचर्चिका" । "केचिद्विचर्चिकातो विपादिकां भिन्ना-माहुः" भावप्र॰ । कुष्ठशब्दे २१५४पृ॰ दृश्यम् ।

**विचार** पु॰ वि+चर-घञ् । १तत्त्वनिर्णये सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षायां २तदनुगुणे वाक्यस्तोमे च । "विपरीतोद्भावकपरविजिगीषया न्यायप्रयोग इति" केचित् प्राहुः । यथा पदार्थानुमानस्थले पर्वतो वह्नि-मान् धूमवत्त्वादित्यादि । अत्र च पर्वते वह्नौ साधनीये प्रतिवादिना च पर्वतो न वह्निमानित्यादि विपरीतवाक्ये प्रयुक्ते मध्यस्थस्य संशयो जन्यते । तन्निरासार्थं वादिना पर्वतो वह्निमानित्यादिप्रतिज्ञादिघटितवाक्यप्रयोगरूपः विचारः क्रियते इति । ४विगतश्चारो यस्मात् प्रा॰ब॰ । चार-शून्ये च "विचारदृक्चारदृगप्यवर्त्तत" ।

**विचारण** न॰ वि+चर-णिच्-ल्युट् । १विचारे शब्दर॰ । युच् । तत्रैव स्त्री अमरः । २मीमांसाशास्त्रे हेमच॰

**विचारित** त्रि॰ विचारो जातोऽस्य इतच् । कृतविचारे ।

**विचाल** त्रि॰ वि+चल–कर्त्तरि ण । १अभ्यन्तरे २अन्त-राले हेमच॰ । वि+चल–णिच् भावे अच् । ३अन्यथा स्थितस्य वस्तुनो विशेषरूपतापादने "अधिकरणविचाले च" पा॰ "द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु" सि॰कौ॰ । [ङीप् ।

**विचि(ची)** पुंस्त्री विच-इक् । तरङ्गे भरतः । स्त्रीत्वपक्षे वा

**विचिकित्सा** स्त्री वि+कित स्वार्थे सन् अ । सन्देहे अमरः ।

**विचित्र** न॰ विशेषेण चित्रम् । १कर्बुरवर्णे । २तद्वति त्रि॰ शब्दच॰ ३आश्चर्य्ये त्रि॰ । ४स्वर्णगौर्य्यां स्त्री राजनि॰ । ५अर्थालङ्कारभेदे न॰ अलङ्कारशब्दे ४०२ पृ॰ दृश्यम् । संज्ञायां कन् । भूर्जपत्रवृक्षे पु॰ राजनि॰ ।

**विचित्रवीर्य्य** पु॰ शान्तनुनृपात्मजे नृपभेदे भा॰ आ॰ १०६ अ॰

**विचित्राङ्ग** पुंस्त्री॰ विचित्रमङ्गं यस्य । (चिते) १व्याघ्रभेदे शब्दच॰ २मयूरे पुंस्त्री॰ शब्दर॰ उभयत्र स्त्रियां ङीष् ३आश्चर्य्यदेहे त्रि॰ ।

**विचेतस्** त्रि॰ विरुद्धं दुष्टं विशिष्टं वा चेतो यस्य । १दुष्ट-चित्ते २विशिष्टचित्ते च । ३दुर्मनस्के हेमच॰ ।

**विचेष्टित** त्रि॰ विगतं चेष्टितमस्य । १चेष्टाशून्ये, वि+चेष्ट-भावे क्त । २विशेषेण चेष्टायाम् न॰ ।

**विच्छ** दीप्तौ चु॰ उभ॰ सक॰ सेट् । विच्छयति ते अविविच्छत् त

**विच्छ** गतौ तु॰ पर॰ स्वार्थे आय, आयपक्षे उ॰ सक॰ सेट् । विच्छायति विच्छायते विच्छति । अविच्छायीत् अविच्छा-यिष्ट अविच्छीत् ।